സമഗ്ര ചോദ്യോത്തരങ്ങൾ

Chapter Name:कनकधारा।                    *Marks :()*

Quest:

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

1.1

१. शङ्करदिग्विजयम् नाम काव्यं कस्मिन् विभागे अन्तर्भवति?

(खण्डकाव्ये, नाटके,महाकाव्ये, चरित्रकाव्ये)

२ शङ्करदिग्विजयस्य कर्ता कः?

(श्रीशङ्करः, माधवविद्यारण्यस्वामी, चरकः, सुरपालः)

३. कनकधारास्तवम् केन विरचितम्?

(श्रीशङ्करेण, माधवविद्यारण्यस्वामिना, चरकेण, सुरपालेन)

४. श्रीशङ्कराचार्यस्य चरितमवलम्ब्य रचितं काव्यम्?

(कनकधारास्तवम्, सौन्दर्यलहरी, शङ्करदिग्विजयम्, शिवानन्दलहरी)

1.2

५ सह शब्दस्य योगे का विभक्तिः?

( तृतीया, पञ्चमी, सप्तमी, द्वितीया)

६. धिक् शब्दयोगे का विभक्तिः?

( तृतीया, द्वितीया, पञ्चमी, प्रथमा)

७. द्विजस्य दारिद्र्यनिवृत्यर्थं शङ्करः कां संस्तुवान्?

(पार्वतीं, लक्ष्मीं, विष्णुं, शिवम्)

८. अद्वैतचिन्ताप्रतिष्ठापकः कः ?

(चिन्मयानन्दस्वामी, श्रीशङ्करः, माधवविद्यारण्यस्वामी, चिदानन्दपुरिस्वामी)

1.3

९. शङ्करद्विग्विजयमहाकाव्यं कमधिकृत्य विरचितं महाकाव्यं भवति ?

(श्रीशङ्करम्, माधवविद्यारण्यस्वामिनम्, चरकम्, सुरपालम्)

१०. शङ्करः किमर्थं सतीर्थ्यैः सह अटनं कृतवान् ?

(पठनाय,अटनाय, भिक्षायै, विनोदाय)

११. द्विजस्य दारिद्र्यनिवृत्यर्थं शङ्करः कां संस्तुतवान् ?

(पार्वतीम्, लक्ष्मीम्, दुर्गाम्, सरस्वतीम्)

१२. द्विजस्य दारिद्र्यनिवृत्तये शङ्करेण आलपितः श्लोकाः केन नाम्ना अभिधीयते ?

(शङ्करदिग्विजयम्, कनकधारास्तवम्, सौन्दर्यलहरी, शिवानन्दलहरी)

१३ शङ्करः कैः सह भिक्षाटनम् अकरोत् ?

(तापसैः सह, सवयोभिः सह, मात्रा सह, पित्रा सह)

**Hint:**

1.1

१. महाकाव्ये।

२ माधवविद्यारण्यस्वामी।

३. श्रीशङ्करेण।

४. शङ्करदिग्विजयम्।

1.2

५ तृतीया।

६. द्वितीया।

७. लक्ष्मीं।

८. श्रीशङ्करः।

1.3

९. श्रीशङ्करम्।

१०. भिक्षायै।

११. लक्ष्मीम्।

१२. कनकधारास्तवम्।

१३ सवयोभिः सह।

**Chapter Name:कनकधारा।** *Marks :(4)*

**Quest:**

**यथोचितं योजयत ।**

2.1 क) द्विजन्मा - भिक्षा ।

सतीर्थ्यः - कदाचित्।

भैक्ष्यम् - ब्राह्मणः।

जातु - ब्रह्मचारिः।

2.2 वटुवर्यः - पूजा ।

कुटुम्बिनी - पुण्यवन्तः।

वरिवस्या - ब्रह्मचारीश्रेष्ठः।

कृतिनः - सहधर्मिणी।

2.3 आमलकं - ब्रह्मचारिश्रेष्ठः।

दयार्द्रधीः - वदन्ती।

उदीरयन्ती - करुणार्द्रचित्तः।

व्रतीन्दुः - धात्रीफलम्

2.4 मुरभित्कुटुम्बिनी - स्तुतिः।

स्तवः - विष्णुपत्नी।

तोषिता - वटुवर्यः।

ब्रह्मचारिश्रेष्ठः - सन्तुष्टा।

2.5 निशम्य - उत्तमशास्त्राणि ।

द्विजवर्यः - बुद्धिमान्।

शास्त्रवराणि - ब्राह्मणश्रेष्ठः।

आत्मवान् - आकर्ण्य।

**2.6** वरिवस्याम् - ऐश्वर्यदेवता।

आमलकम् - ल्यबन्तमव्ययम्।

निशम्य - शुश्रुषाम्।

मुरभित्कुटुम्बिनी - धात्रीफलम्।

2.7 द्विजन्म - सहधर्मिणी

कुटुम्बिनी - ब्रह्मचारिश्रेष्ठः

भैक्ष्यम् - ब्राह्मणः

वटुवर्यः - भिक्षा

**Hint:** 2.1

द्विजन्मा - ब्राह्मणः।

सतीर्थ्यः - ब्रह्मचारिः।

भैक्ष्यम् - भिक्षा ।

जातु - कदाचित्।

**2.2**

वटुवर्यः - ब्रह्मचारीश्रेष्ठः।

कुटुम्बिनी - सहधर्मिणी।

वरिवस्या - पूजा ।

कृतिनः - पुण्यवन्तः।

2.3

आमलकम् - धात्रीफलम्।

दयार्द्रधीः - करुणार्द्रचित्तः।

उदीरयन्ती - वदन्ती।

व्रतीन्दुः - ब्रह्मचारिश्रेष्ठः।

**2.4**

मुरभित्कुटुम्बिनी - विष्णुपत्नी।

स्तवः - स्तुतिः।

तोषिता - सन्तुष्टा।

ब्रह्मचारिश्रेष्ठः - वटुवर्यः।

**2.5**

निशम्य - आकर्ण्य।

द्विजवर्यः - ब्राह्मणश्रेष्ठः।

शास्त्रवराणि - उत्तमशास्त्राणि ।

आत्मवान् - बुद्धिमान्।

**2.6**

वरिवस्याम् - शुश्रूषाम्।

आमलकम् - धात्रीफलम्।

निशम्य - ल्यबन्तमव्ययम्।

मुरभित्कुटुम्बिनी - ऐश्वर्यदेवता।

**2.7**

द्विजन्म - ब्राह्मणश्रेष्ठः

कुटुम्बिनी - सहधर्मिणी

भैक्ष्यम् - भिक्षा

वटुवर्यः - ब्रह्मचारिश्रेष्ठः

**Chapter Name:कनकधारा।** *Marks :(3)*

**Quest:**

समानार्थकपदानि चित्वा पट्टिकां पूरयत।

(भवनम्, वटुः, आमलकम्, कमला, ब्रह्मचारी, गृहम्, धात्रीफलम्, लक्ष्मीः)

| | |
|---|---|
| आमलकम् | धात्रीफलम् |
| भवनम् | |
| वटुः | |
| कमला | |

**Hint:**

| | |
|---|---|
| आमलकम् | धात्रीफलम् |
| भवनम् | गृहम्, |
| वटुः | ब्रह्मचा |
| कमला | लक्ष्मीः |

**Chapter Name:कनकधारा।** *Marks :(2)*

Quest:

**श्लोकस्य उचितमाशयं चित्वा लिखत।**

तमवोचत तत्र सादरं

वटुवर्यं गृहिणः कुटुम्बिनी।

कृतिनो हि भवादृशेषु ये

वरिवस्यां प्रतिपादयन्ति ते ।।

1. ब्रह्मचारिश्रेष्ठानां पूजां कुर्वन्तः पुण्यवन्तः एव।
2. अपरेषां कृते प्रयोजनरहितं जन्म निरर्थकमेव।
3. स्तवेन सन्तुष्टा कमला भवनं सुवर्णामलकैः पूरयामास।

Hint:

1. ब्रह्मचारिश्रेष्ठानां पूजां कुर्वन्तः पुण्यवन्तः एव।

Chapter Name:**कनकधारा।** *Marks :(4)*

Quest:

**श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

स हि जातु गुरोः कुले वसन्

सवयोभिः सह भैक्ष्यलिप्सया।

भगवान् भवनं द्विजन्मनो

धनहीनस्य विवेश कस्यचित्।।

1. भगवान् कीदृशस्य द्विजन्मनः भवनं विवेश?
2. श्लोकात् एकं शत्रन्तरूपं चित्वा लिखत?
3. श्लोके गृहम् इत्यर्थकं पदं किम्?

4. भगवान् किमर्थं द्विजन्मनः भवनं विवेश?

**Hint:**

1. भगवान् धनहीनस्य द्विजन्मनः भवनं विवेश।
2. वसन्।
3. भवनम्।
4. भगवान् भैक्ष्यलिप्सया द्विजन्मनः भवनं विवेश।

**Chapter Name:कनकधारा।** *Marks :(4)*

**Quest:**

विधिना खलु वञ्चिता वयं

वितरीतुं वटवे न शक्नुमः।

अपि भैक्ष्यमकिञ्चनत्वतो

धिगिदं जन्म निरर्थकं गतम्।।

1. किं निरर्थकं गतम्?

2. वयं केन वञ्चिताः?

3. कस्मै भैक्ष्यं विपरीतुं न शक्नुमः?

4. श्लोके "निष्प्रयोजनं" इत्यर्थे प्रयुक्तं पदं किम्?

**Hint:**

१ जन्म।

२ विधिना।

३ वटवे।

४ निरर्थकम्।

**Chapter Name:कनकधारा।** *Marks :(4)*

**Quest:**

**प्रादेशिकभाषया लिखत।**

श्रीशङ्कराचार्येण विरचितं स्तोत्रकाव्यं भवति सौन्दर्यलहरी। तस्मिन् देवीस्तुतिः चारुतया काव्यरूपेण प्रतिपादिता। शिवपत्न्याः शक्त्याः स्तुतिरूपेयं कृतिः। तत्र शतं श्लोकाः विद्यन्ते। सौन्दर्यलहर्यां वेद-तन्त्र-मन्त्र— अलङ्कारशास्त्रादयः च अन्तर्भूताः वर्तन्ते।

**Hint:**

* आशयग्रहणाय -१

* उचितलेखनाय -२

* भाषाशैली -१

**Chapter Name:कनकधारा।** *Marks :(2)*

**Quest:**

पट्टिकां पूरयत।

| कृतिः | विभागः | कर्ता |
| --- | --- | --- |
| शङ्करदिग्विजयम् | ------- | माधवविद्यारण्यस्वामी। |
| कनकधारास्तोत्रम् | स्तोत्रकाव्यम् | -------- |

**Hint:**

१ महाकाव्यम्

२ श्रीशङ्कराचार्यः

**Chapter Name:कनकधारा।** *Marks :(4)*

**Quest:**

**संभाषणं संभाव्य लिखत।**

क

वटुः - अम्ब! भिक्षां देहि।

ब्राह्मणपत्नी - अतितेजस्वी बालः। कस्त्वम्?----------------- आगतवान्?

वटुः - मातः! शङ्करोऽहम्। समीपस्थात् गुरुकुलात् आगतवान्।

ब्राह्मणपत्नी - - ------------- आगतवान्?

वटुः - भिक्षार्थम् आगतवान्।

ब्राह्मणपत्नी - दारिद्र्यात् भिक्षां दातुम् अहम् असमर्था।

वटुः - --------------------! चिन्ता मास्तु।

ब्राह्मणपत्नी - वत्स! अत्र केवलम् -------------- एव अस्ति।

वटुः - आमलकं वा? दीयताम्। भवत्याः दारिद्र्यनिवारणाय प्रार्थयाम्यहम्।

ख). **गद्यांशं पठित्वा सम्भाषणं लिखत।**

गुरुकुले वसन् श्रीशङ्करः भिक्षार्थं सतीर्थ्यैः सह एकं ब्राह्मणगृहं प्राप्तवान्। "मातः! भिक्षां देहि"इति शब्दं श्रुत्वा बहिरागता ब्राह्मणपत्नी दीनवचसा भिक्षां दातुं किमपि नास्तीति अवदत् । " भवती! यत्किमपि दीयताम्" इति तस्य वचनमनुसृत्य माता शुष्कमेकम् आमलकम् आनयत्। बाल! इदं स्वीकरोतु इत्युक्त्वा शङ्कराय अदात्।

शङ्करः - गृहमिदं प्रविशामः।

वटुः - गृहेऽस्मिन् कोऽपि नास्तीति मन्ये ।

शङ्करः - आह्वयामः ।-----------------।

माता - ----------------------------।

शङ्करः - ----------------------------।

माता - ----------------------------।

शङ्करः - मङ्गलाय प्रार्थयाम्यहम् ।।

**Hint:**

**क)**

1. कुतः 2. किमर्थम् 3. मातः 4. आमलकम्।

**ख)**

-आशयग्रहणाय -2, उचितसम्भाषणलेखनाय- 2

Chapter Name:कनकधारा।  *Marks :(2)*

Quest:

**सूचनानुसारं गद्यक्रमं लिखत।**

10.1

क)

तमवोचत तत्र सादरं

वटुवर्यं गृहिणः कुटुम्बिनी।

कृतिनो हि भवादृशेषु ये

वरिवस्यां प्रतिपादयन्ति ते।

तत्र -------- कुटुम्बिनी तं ---------सादरं च अवोचत। ये ----- वरिवस्यां प्रतिपादयन्ति ते ----------- हि।

10.2

ख)

**स हि जातु गुरोः कुले वसन्**

**सवयोभिः सह भैक्ष्यलिप्सया।**

**भगवान् भवनं द्विजन्मनो**

**धनहीनस्य विवेश कस्यचित्।।**

गुरोः कुले वसन् ---- भैक्ष्यलिप्सया ---सह जातु कस्यचित् ----द्विजन्मनः भवनं ------ -।

Hint:

आशयग्रहणाय -१, उचितगद्यक्रमलेखनाय-१

Chapter Name:कनकधारा।                *Marks :(2)*

Quest:

11.1 अपरेषां कृते प्रयोजनरहितं जन्म निन्दनीयम् इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत।

क)

तमवोचत तत्र सादरं

वटुवर्यं गृहिणः कुटुम्बिनी।

कृतिनो हि भवादृशेषु ये

वरिवस्यां प्रतिपादयन्ति ते।।

ख)

विधिना खलु वञ्चिता वयं

वितरीतुं वटवे न शक्नुमः।

अपि भैक्ष्यमकिञ्चनत्वतो

धिगिदं जन्म निरर्थकं गतम्।।

11. 2 सकरुणं वचनं आकर्ण्य सः दयार्द्रहृदयः अभवत् इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत।

क)

इति दीनमुदीरयन्त्यसौ

प्रददावामलकं व्रतीन्दवे।

करुणं वचनं निशम्य सोƒ-

प्यभवज्ज्ञाननिधिर्दयार्द्रधीः।।

ख]

अमुना वचनेन तोषिता

कमला तद्भवनं समन्ततः।

कनकामलकैरपूरय-

ज्जनताया हृदयं च विस्मयैः।।

Hint:

**11.1**

ख). विधिना खलु वञ्चिता वयं

वितरीतुं वटवे न शक्नुमः।

अपि भैक्ष्यमकिञ्चनत्वतो

धिगिदं जन्म निरर्थकं गतम्।।

11.2

क)

इति दीनमुदीरयन्त्यसौ

प्रददावामलकं व्रतीन्दवे।

करुणं वचनं निशम्य सोƒ-

प्यभवज्ज्ञाननिधिर्दयार्द्रधीः।।

Chapter Name:कनकधारा।                    *Marks :(4)*

Quest:

**उदाहरणानुसारं पदच्छेदं लिखत।**

12.1 धिगिदम् - धिक् + इदम्।

वागीशः - ---- + -------।

वागियम् - ---- + -------।

**अप्यभवत् - अपि + अभवत्।**

12.2

इत्यपि - ---- + -------।

इत्यत्र - -----+ -------।

करोत्यत्र - -----+ -------।

इत्याशयः - -----+ -------।

कार्याण्यपि - -----+ -------।

**12.3 उदाहरणानुसारं सन्धिरूपं लिखत।**

**प्रददौ+ आमलकम् - प्रददावामलकम्।**

तौ + अनादृत्य - ---- -------।

बालौ + आगच्छतः - ---- -------।

Hint:

12.1

वाक् + ईशः।

वाक् + इयम्

12.2

इति + अपि।

इति +अत्र

करोति +अत्र

इति +आशयः

कार्याणि +अपि

12.3

तावनादृत्य।

बालावागच्छतः

**Chapter Name:कनकधारा।** *Marks :(4)*

**Quest:**

**उदाहरणानुसारं विग्रहवाक्यं लिखत।**

**उदा- सादरम्- आदरेण सह वर्तते।**

क). साश्चर्यम् - ---------------।

ख). सामोदम् - --------------।

**उदा- धनेन हीनः - धनहीनः।**

क) --------------- - ज्ञानहीनः।

ख) ---------------- धैर्यहीनः।

**Hint:**

क) आश्चर्येण सह वर्तत इति

ख) आमोदेन सह वर्तत इति सामोदम्

ग) ज्ञानेन हीनः ज्ञानहीनः।

घ) धैर्येणहीनः धैर्यहीनः।